# Devi Namavali from Shankaracharya's Saundaryalahari

# સૌન્દર્યલહર્યધિષ્ઠિતા દેવીનામાવલિઃ

## Document Information

Text title : Shri Devi Namavali constructed from Shankaracharya Saundaryalahari

File name : saundaryalaharyadhiShThitAdevInAmAvaliH.itx

Category : devii, nAmAvalI, laharI, shankarAchArya, devI, dashamahAvidyA

Location : doc_devii

Author : Constructed by Narendran Madathil madathilnarendran at gmail.com

Transliterated by : Narendran Madathil madathilnarendran at gmail.com

Proofread by : Narendran Madathil

Latest update : May 11, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2024

*sanskritdocuments.org*

# સૌન્દર્યલહર્યધિષ્ઠિતા દેવીનામાવલિઃ

(અવલમ્બઃ - શ્રી આદિશઙ્કરાચાર્યવિરચિતં સૌન્દર્યલહરીસ્તોત્રમ્)

અમ્મે નારાયણ દેવિ નારાયણ લક્ષ્મિનારાયણ ભદ્રે નારાયણ ।

ૐ

હરિઃ શ્રીગણપતયે નમઃ ।

શ્રીમહાસરસ્વત્યૈ નમઃ ।

ૐ શ્રીગુરુભ્યો નમઃ ।

ૐ ઐં હ્રીં ક્લીં ચામુણ્ડાયૈ વિચ્ચે ।

શ્રીહેમામ્બિકાયૈ નમઃ ।

નમશ્શિવાયૈ ચ નમશ્શિવાય ।

ૐ સર્વચૈતન્યરૂપાં તાં આદ્યાં વિદ્યાં ચ ધીમહિ બુદ્ધિં યા નઃ પ્રચોદયાત્ ।

ક્રમસઙ્ખ્યા. નામાનિ । (શ્લોકઃ)

૧. શિવયુક્તાયૈ શક્ત્યૈ નમઃ । (૧)

૨. યસ્યાઃ વિયોગે શિવઃ સ્પન્દિતુમપિ શક્તો ન ભવતિ તસ્યૈ શક્ત્યૈ નમઃ । (૧)

૩. હરિહરવિરિઞ્ચાદિભિરપ્યારાધ્યાયૈ મહાદેવ્યૈ નમઃ । (૧)

૪. યાં પ્રણન્તું સ્તોતું ચ અકૃતપુણ્યઃ ન પ્રભવતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૧)

૫. યસ્યાઃ ચરણપઙ્કેરુહભવં તનીયાંસં પાંસું સઞ્ચિન્વન્ વિરિઞ્ચિઃ લોકાન્ વિરચયતિ તસ્યૈ શક્ત્યૈ નમઃ । (૨)

૬. યસ્યાઃ અનુગ્રહેણ શૌરિઃ સહસ્રેણ શિરસા કથમપિ લોકાન્ અવિકલં વહતિ તસ્યૈ શક્ત્યૈ નમઃ । (૨)

૭. યસ્યાઃ ચરણપાંસું સઙ્ક્ષુદ્ય હરઃ ભસ્મોદ્ધૂલનવિધિં ભજતિ તસ્યૈ શક્ત્યૈ નમઃ । (૨)

૮. અવિદ્યાનાં અન્તસ્તિમિરમિહિરદ્વીપનગર્યૈ મહાદેવ્યૈ નમઃ । (૩)

૯. જડાનાં ચૈતન્યસ્તબકમકરન્દસ્રુતિઝર્યૈ મહાદેવ્યૈ નમઃ । (૩)

૧૦. દરિદ્રાણાં ચિન્તામણિગુણનિકાયૈ મહાદેવ્યૈ નમઃ । (૩)

૧૧. જન્મજલધૌ નિમગ્નાનાં મુરરિપુવરાહસ્ય દંષ્ટ્રાયૈ મહાદેવ્યૈ નમઃ । (૩)

૧૨. ભયાત્રાતું વાઞ્છાસમધિકં ફલમપિ દાતુઞ્ચ પ્રકટિત વરાભીત્યભિનયાભ્યાં દેવ્યાઃ નિપુણચરણાભ્યાં નમઃ । (૪)

૧૩. લોકાનાં શરણ્યાયૈ મહાદેવ્યૈ નમઃ । (૪)

૧૪. પ્રણતજનસૌભાગ્યજનન્યૈ મહાદેવ્યૈ નમઃ । (૫)

૧૫. યાં આરાધ્ય હરિઃ પુરા નારીભૂત્વા પુરરિપુમપિ ક્ષોભમનયત્ તસ્યૈ મહાદેવ્યૈ નમઃ । (૫)
૧૬. યાં નત્વા સ્મરોઽપિ રતિનયનલેહ્યેન વપુષા મહતાં મુનીનામપિ મોહાય અન્તઃ પ્રભવતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૫)
૧૭. યસ્યાઃ કામપિ કૃપાં અપાઙ્ગાત્ લબ્ધ્વા અનઙ્ગો જગદિદં વિજયતે તસ્યૈ મહાદેવ્યૈ નમઃ । (૬)
૧૮. ક્વણત્કાઞ્ચીદામાયૈ કરિકળભકુમ્ભસ્તનનતાયૈ મહાદેવ્યૈ નમઃ । (૭)
૧૯. મધ્યે પરિક્ષીણાયૈ પરિણતશરચ્ચન્દ્રવદનાયૈ મહાદેવ્યૈ નમઃ । (૭)
૨૦. કરતલૈર્ધનુર્બાણાન્ પાશં સૃણીમપિ દધાનાયૈ મહાદેવ્યૈ નમઃ । (૭)
૨૧. પુરમથિતુરાહોપુરુષિકાયૈ મહાદેવ્યૈ નમઃ । (૭)
૨૨. સુધાસિન્ધોર્મધ્યે સુરવિટપિવાટીપરિવૃતે મણિદ્વીપે નીપોપવનવતિ ચિન્તામણિગૃહે શિવાકારે મઞ્ચે પરમશિવપર્યઙ્કનિલયાયૈ ચિદાનન્દલહર્યૈ મહાદેવ્યૈ નમઃ । (૮)
૨૩. યા મૂલાધારે મહીં, મણિપૂરે કં, સ્વાધિષ્ઠાને સ્થિતં હુતવહં, હૃદિ મરુતં, ઉપરિ આકાશં, ભ્રૂમધ્યે મનોઽપિ સકલં કુળપથં ભિત્વા સહસ્રારે પદ્મે રહસિ પત્યા સહ વિહરતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૯)
૨૪. ચરણયુગળાન્તર્વિગળિતૈઃ સુધાધારાસારૈઃ પ્રપઞ્ચં સિઞ્ચન્ત્યૈ મહાદેવ્યૈ નમઃ । (૧૦)
૨૫. રસામ્નાયમહસઃ સ્વાં ભૂમિં અવાપ્ય સ્વમાત્માનં ભુજગનિભં અદ્ધ્યુષ્ટવલયં કૃત્વા કુળકુણ્ડે કુહરિણિ સ્વપન્ત્યૈ મહાદેવ્યૈ નમઃ । (૧૦)
૨૬. યસ્યાઃ શરણકોણાઃ ચતુર્ભિશ્શ્રીકણ્ઠૈઃ, શમ્ભોઃ પ્રભિન્ના પઞ્ચભિઃ શિવયુવતિભિઃ ઇતિ નવભિઃ મૂલપ્રકૃતિભિરપિ, વસુદળકલાશ્રત્રિવલયત્રિરેખાભિઃ સાર્દ્ધં પરિણતાઃચતુશ્ચત્વારિંશત્ ભવન્તિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૧૧)
૨૭. યસ્યાઃ સૌન્દર્યં તુલયિતું વિરિઞ્ચિપ્રભૃતયઃ કવીન્દ્રાઽપિ ન શક્નુવન્તિ તસ્યૈ તુહિનગિરિકન્યાયૈ મહાદેવ્યૈ નમઃ । (૧૨)
૨૮. યસ્યાઃ આલોકૌત્સુક્યાદમરલલના તપોભિઃ દુષ્પ્રાપાં ગિરિશસાયૂજ્યપદવીમપિ મનસા યાન્તિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૧૨)
૨૯. યસ્યાઃ અપાઙ્ગાલોકે પતિતં વર્ષીયાંસં નયનવિરસં નર્મસુ જડં નરં શતશઃ ગળદ્વેણીબન્ધાઃ કુચકલશવિસ્રસ્તસિચયાઃ હઠાત્ ત્રુટ્યત્કાઞ્ચ્યઃ વિગળિતદુકૂલાઃ શતશઃ યુવતયઃ અનુધાવન્તિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૧૩)
૩૦. યસ્યાઃ પાદામ્બુજયુગં ક્ષિતૌ ષટ્પઞ્ચાશત્, ઉદકે દ્વિસમધિકપઞ્ચાશત્, હુતાશે દ્વાષષ્ટિઃ, અનિલે ચતુરધિકપઞ્ચાશત્, દિવિ દ્વિઃષટ્ત્રિંશત્, મનસિ ચતુઃષષ્ટિ ચ મયુખાનામુપરિ વર્તતે તસ્યૈ મહાદેવ્યૈ નમઃ । (૧૪)
૩૧. શરજ્જ્યોત્સ્નાશુભ્રાયૈ શશિયુતજટામકુટાયૈ વરત્રાસત્રાણસ્ફટિકઘુટિકાપુસ્તકકરાયૈ મહાદેવ્યૈ નમઃ । (૧૫)
૩૨. યાં સકૃન્નત્વા સતાં મધુક્ષીરદ્રાક્ષામધુરિમધુરીણા ભણિતયઃ સન્નિદધતે તસ્યૈ મહાદેવ્યૈ નમઃ । (૧૫)
૩૩. યાં કતિચિત્ સન્તઃ કવીન્દ્રાણાં ચેતઃકમલબાલાતપરુચિં અરુણાં એવ ભજન્તે તસ્યૈ મહાદેવ્યૈ નમઃ । (૧૬)
૩૪. સતાં રઞ્જનં વિદધું તરુણતરશૃઙ્ગારલહરીગભીરવાક્પ્રદાયિન્યૈ વિરિઞ્ચિપ્રેયસ્યૈ મહાદેવ્યૈ નમઃ । (૧૬)
૩૫. વાચાં સવિત્રીભિઃ શશિમણિશિલાભઙ્ગરુચિભિઃ વશિન્યાદિભિઃ સહ જનન્યૈ મહાદેવ્યૈ નમઃ । (૧૭)

૩૬. મહતાં ભઙ્ગિરુચિભિઃ વાગ્દેવીવદનકમલામોદમધુરૈઃ વચોભિઃ કાવ્યાનાં કર્તૃત્વપટુત્વદાયિન્યૈ મહાદેવ્યૈ નમઃ । (૧૭)

૩૭. યસ્યાઃ તરુણતરણિશ્રીસરણિભિઃ તનુચ્છાયાભિઃ સર્વાં દિવં ઉર્વીં ચ અરુણિમનિમગ્નાં રૂપધ્યાનેન ઉર્વશ્યા સહ ત્રસ્યદ્વનહરિણશાલીનનયનાઃ ગીર્વાણગણિકાઃ વશ્યા ભવન્તિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૧૮)

૩૮. મુખં બિન્દું કૃત્વા તસ્ય અધઃ કુચયુગં તદધઃ હરાર્દ્ધં ઇતિ યસ્યાઃ મન્મથકલાધ્યાનેન વનિતાઃ અતિલઘુ સઙ્ક્ષોભં નયતિ પુનઃ ધ્યાનનિષ્ઠયા રવીન્દુસ્તનયુગાં ત્રિલોકીમપ્યાશુ ભ્રમયતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૧૯)

૩૯. અઙ્ગેભ્યઃ કિરણનિકુરુમ્બામૃતરસં કિરન્તીં હિમકરશિલામૂર્તિમિવ યાં ધ્યાત્વા સર્પાણાં દર્પશમકઃ શકુન્તાધિપઃ ઇવ, સુધાધારસિરયા દૃષ્ટ્યા, જ્વરશમનપ્રાપ્તિં લભતે તસ્યૈ મહાદેવ્યૈ નમઃ । (૨૦)

૪૦. તટિલ્લેખાતન્વીં તપનશશિવૈશ્વાનરમયીં ષણ્ણાં કમલાનામપ્યુપરિ મહાપદ્માટવ્યાં નિષણ્ણાં દેવીકલાં મૃદિતમલમાયેન મનસા પશ્યતાં મહતાં પરમાહ્લાદલહરીપ્રદાયિન્યૈ મહાદેવ્યૈ નમઃ । (૨૧)

૪૧. ભવાનિ ત્વં દાસે મયિ સકરુણાં દૃષ્ટિં વિતર ઇતિ સ્તોતું વાઞ્છન્ "ભવાનિ ત્વં" ઇતિ કથનાદેવ મુકુન્દબ્રહ્મેન્દ્રસ્ફુટમકુટનીરાજિતપદનિજસાયુજ્યપદવીદાયિન્યૈ મહાદેવ્યૈ નમઃ । (૨૨)

૪૨. વામં વપુઃ હૃત્વા, અપરિતૃપ્તેન મનસા, શમ્ભોરપરમપિ દેવ્યા હૃતમભૂત્ ઇતિ શઙ્કાકારિણ્યૈ મહાદેવ્યૈ નમઃ । (૨૩)

૪૩. સકલમરુણાભારૂપાયૈ ત્રિણયનાયૈ કુચાભ્યામાનમ્રાયૈ કુટિલશશિમકુટાયૈ મહાદેવ્યૈ નમઃ । (૨૩)

૪૪. યસ્યાઃ ક્ષણચલિતયોઃ ભ્રૂલતિકયોઃ આજ્ઞામાલમ્બ્ય ધાતા જગત્સૂતે, હરિરવતિ, રુદ્રઃ ક્ષપયતે એતત્ સર્વં તિરસ્કુર્વન્ સ્વં વપુરપિ ઈશઃ તિરયતિ, સદાપૂર્વઃ શિવઃ તત્ ઇદં સર્વં અનુગૃહ્ણાતિ ચ તસ્યૈ મહાદેવ્યૈ નમઃ । (૨૪)

૪૫. યસ્યાઃ ચરણયોઃ યા પૂજાઃ વિરચિતા સા ત્રિગુણજનિતાનાં ત્રયાણાં દેવાનાં અપિ પૂજા ભવતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૨૫)

૪૬. યસ્યાઃ પાદોદ્વહનમણિપીઠસ્ય નિકટે ત્રયો દેવાऽપિ મુકુળિતકરોત્તંસમકુટાઃ શશ્વત્ સ્થિતાઃ દૃશ્યતે તસ્યૈ મહાદેવ્યૈ નમઃ । (૨૫)

૪૭. વિરિઞ્ચિઃ પઞ્ચત્વં વ્રજતિ, હરિર્વિરતિમાપ્નોતિ, કીનાશો વિનાશં ભજતિ, ધનદઃ નાશં યાતિ, માહેન્દ્રી વિતતિરપિ સમ્મીલિતદૃશા વિતન્દ્રી ભવતિ, તદાપિ અસ્મિન્ મહાસંહારે યસ્યાઃ પતિરેવ વિહરતિ તસ્યૈ સત્યૈ મહાદેવ્યૈ નમઃ । (૨૬)

૪૮. આત્માર્પણદૃશા મયા કૃત જલ્પઃ જપઃ, સકલં શિલ્પમપિ મુદ્રાવિરચના, ગતિઃ પ્રાદક્ષિણ્યક્રમણં, અશનાદિ આહુતિવિધિઃ, સંવેશઃ પ્રણામઃ અખિલં સુખં યત્ મે વિલસિતં દેવીસપર્યાપર્યાયો ભવતુ ઇતિ મયા પ્રાર્થ્યમાનાયૈ મહાદેવ્યૈ નમઃ । (૨૭)

૪૯. વિશ્વે વિધિશતમખાદ્યા દિવિષદઃ પ્રતિભયજરામૃત્યુહરિણીં સુધાં આસ્વાદ્યાપિ વિપદ્યન્તે, તથાપિ યસ્યાઃ તાટઙ્કમહિમયા કરાળં ક્ષ્વેળં કબળિતવતઃ શમ્ભોઃ કાલકલનં નાસ્તિ તસ્યૈ જનન્યૈ મહાદેવ્યૈ નમઃ । (૨૮)

૫૦. ભવસ્ય ભવનં ઉપયાતસ્ય યસ્યાઃ પ્રસભં અભ્યુત્થાને, બ્રહ્મવિષ્ણ્વેન્દ્રેષુ પ્રણમ્રેષુ "પુરો વૈરિઞ્ચં કિરીટં પરિહર, કૈટભભિદઃ કઠોરે કોટીરે સ્ખલસિ, જમ્ભારિમકુટં પરિહર" ઇતિ પરિજનોક્તિઃ શ્રૂયતે તસ્યૈ મહાદેવ્યૈ નમઃ । (૨૯)

૫૧. સ્વદેહોત્ભૂતાભિઃ ઘૃણિભિઃ અણિમાદ્યાભિઃ અભિતઃ દેવીં અહમિતિ સદા ભાવયતિ યઃ, યસ્યાઃ કૃપયા, તસ્ય ત્રિણયનસમૃદ્ધિં તૃણયતઃ, મહાસંવર્તાગ્નિઃ નીરાજનવિધિં વિરજયતિ, તસ્યૈ નિત્યાયૈ નિષેવ્યાયૈ મહાદેવ્યૈ નમઃ । (૩૦)
૫૨. પશુપતિઃ તત્તત્સિદ્ધિપ્રસવપરતન્ત્રૈઃ ચતુઃષષ્ટ્યા તન્ત્રૈઃ સકલં ભુવનં અતિસન્ધાય સ્થિતઃ પુનઃ યસ્યાઃ નિર્બન્ધાત્ અખિલપુરુષાર્થૈકઘટનાસ્વતન્ત્રં ઇદં દેવ્યાઃ તન્ત્રં ક્ષિતિતલં અવાતીતરત્ તસ્યૈ મહાદેવ્યૈ નમઃ । (૩૧)
૫૩. શિવઃ, શક્તિઃ, કામઃ, ક્ષિતિઃ, રવિઃ, શીતકિરણઃ, સ્મરઃ, હંસઃ, શક્રઃ, તદનુ પરા, મારઃ, હરિઃ ઇતિ અમી વર્ણાઃ તિસૃભિઃ હૃલ્લેખાભિઃ અવસાનેષુ ઘટિતાઃ વર્ણાઃ યસ્યાઃ નામાવયવતાં ભજન્તે તસ્યૈ જનન્યૈ મહાદેવ્યૈ નમઃ । (૩૨)
૫૪. નિરવધિમહાભોગરસિકાઃ આદૌ સ્મરં યોનિં લક્ષ્મીં ઇદં ત્રિતયં મનોઃ નિધાય ચિન્તામણિગુણનિબદ્ધાક્ષવલયાઃ શિવાગ્નૌ સુરભિઘૃતધારાહુતિશતૈઃ જુહ્વન્તઃ યાં ભજન્તિ તસ્યૈ નિત્યાયૈ મહાદેવ્યૈ નમઃ । (૩૩)
૫૫. શમ્ભોઃ શશિમિહિરવક્ષોરુહયુગશરીરાયૈ ભગવત્યૈ મહાદેવ્યૈ નમઃ । (૩૪)
૫૬. યસ્યાઃ આત્માનં અનઘં નવાત્માનં મન્યતે તસ્યૈ મહાદેવ્યૈ નમઃ । (૩૪)
૫૭. યાભ્યાં શેષશ્શેષીસમ્બન્ધઃ ઉભયસાધારણતયા સ્થિતઃ તાભ્યાં સમરસપરાનન્દપરયોઃ મહાદેવીદેવાભ્યાં નમઃ । (૩૪)
૫૮. મનોવ્યોમમરુન્મરુત્સારથિઃ આપોભૂમિઃ ઇત્યેવં પરિણતાયૈ યસ્યાઃ પરં નાસ્તિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૩૫)
૫૯. યા વિશ્વવપુષા પરિણમયિતું શિવયુવતિભાવેન સ્વાત્માનં ચિદાનન્દાકારં બિભૃષે તસ્યૈ મહાદેવ્યૈ નમઃ । (૩૫)
૬૦. આજ્ઞાચક્રસ્થસ્ય તપનકોટિદ્યુતિશશિધરસ્ય પરચિતા પરિમિળિતપાર્શ્વસ્થસ્ય વન્દ્યસ્ય શમ્ભોઃ પત્ન્યૈ મહાદેવ્યૈ નમઃ । (૩૬)
૬૧. યં ભક્ત્યા આરાધ્યન્ રવિશશિશુચીનાં અવિષયે નિરાલોકે અલોકે ભાલોકભુવને નિવાસઃ સાધ્યો ભવતિ તસ્ય પરમેશ્વરસ્ય પત્ન્યૈ મહાદેવ્યૈ નમઃ । (૩૬)
૬૨. વિશુદ્ધૌ શુદ્ધસ્ફટિકવિશદાય વ્યોમજનકાય શિવાય મહાદેવાય શિવસમાનવ્યવસિતાયૈ મહાદેવ્યૈ ચ નમઃ । (૩૭)
૬૩. યયોઃ યાન્ત્યાઃ શશિકિરણસારૂપ્યસરણેઃ કાન્ત્યા વિધૂતાન્તર્દ્ધ્વાન્તા જગતી ચકોરી ઇવ વિલસતિ તાભ્યાં મહાદેવીમહાદેવાભ્યાં નમઃ । (૩૭)
૬૪. સમુન્મીલત્સંવિત્કમલમકરન્દરસિકાભ્યાં મહતાં માનસચરાભ્યાં કિમપિ હંસદ્વન્દ્વાય મહાદેવીમહાદેવાભ્યાં નમઃ । (૩૮)
૬૫. યાભ્યાં આલાપાત્ અષ્ટાદશગુણિતવિદ્યાપરિણતિઃ અભવત્, યો હંસદ્વન્દ્વં દોષાત્ અખિલં ગુણં અદ્ભ્યઃ પયઃ ઇવ આદત્તે તાભ્યાં મહાદેવીમહાદેવાભ્યાં નમઃ । (૩૮)
૬૬. સ્વાધિષ્ઠાને હુતવહં સંવર્ત્તં નિરતં અધિષ્ઠાય અનવરતં સ્તૂયમાનાય મહાદેવાય મહતીં સમયાયૈ મહાદેવ્યૈ ચ નમઃ । (૩૯)
૬૭. મહતિ ક્રોધકલિતે રુદ્રાલોકે લોકાન્ દહતિ સતિ યા દયાર્દ્રા દૃષ્ટ્યા શિશિરં ઉપચારં રચયતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૩૯)
૬૮. તિમિરપરિપન્થિસ્ફુરણયા શક્ત્યા તટિત્વન્તં સ્ફુરન્નાનારત્નાભરણપરિણદ્ધેન્દ્રધનુષે શ્યામાય હરમિહિરતપ્તં ત્રિભુવનં વર્ષતે કમપિ મેઘરૂપાય મહાદેવ્યાઃ મણિપૂરૈકશરણાય મહાદેવાય નમઃ । (૪૦)

૬૯. મૂલે આધારે લાસ્યપરયા સમયયા સહ નવમહારસતાણ્ડવનટાય નવાત્મને મહાદેવાય મહાદેવ્યૈ ચ નમઃ । (૪૧)
૭૦. ઉદયવિધિં ઉદ્દિશ્ય દયયા સનાથાભ્યાં એતાભ્યાં ઉભાભ્યાં ઇદં જગત્ જનકજનનીમત્ જ્ઞાયતે તાભ્યાં મહાદેવીમહાદેવાભ્યાં નમઃ । (૪૧)
૭૧. નીડે યચ્છાયાચ્છુરણશબળં ધનુઃશૌનાસીરં ઇતિ દૃશ્યમાનં ચન્દ્રશકલં માણિક્યત્વં ગતૈઃ ગગનમણિભિઃ સાન્દ્રઘટિતહૈમકિરીટં ચ ધૃતવત્યૈ હિમગિરિસુતાયૈ મહાદેવ્યૈ નમઃ । (૪૨)
૭૨. યસ્યાઃ દલિતેન્દીવરવનતુલિતસ્ય ઘનસ્નિગ્ધશ્લક્ષ્ણચિકુરનિકુરુમ્બસ્ય સહજં સૌરભ્યં ઉપલબ્ધું વલમથનવાટીવિટપિનાં સુમનસઃ યસ્મિન્ કેશભારે વસન્તિ તસ્યૈ ધ્વાન્તનાશિન્યૈ શિવાયૈ મહાદેવ્યૈ નમઃ । (૪૩)
૭૩. યસ્યાઃ વદનસૌન્દર્યલહરીપરીવાહઃ સ્રોતસ્સરણીસમાનસીમન્તસરણિઃ પ્રબલકબરીભારતિમિરદ્વિષાં વૃન્દૈઃ બન્દીકૃત નવીનાર્કકિરણં ઇવ દૃશ્યતે તસ્યૈ ક્ષેમકારિણ્યૈ મહાદેવ્યૈ નમઃ । (૪૪)
૭૪. યસ્યાઃ દશનકિઞ્જલ્કરુચિરે, પઙ્કેરુહરુચિં પરિહસતિ દરસ્મેરે, અરાળૈસ્સ્વાભાવ્યાત્ અળિકળભસશ્રીભિઃ અળકૈઃ પરીતં સુગન્ધૌ વક્ત્રે સ્મરદહનચક્ષુર્મધુલિહઃ માદ્યન્તિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૪૫)
૭૫. યસ્યાઃ લલાટં લાવણ્યદ્યુતિવિમલં મકુટઘટિતં દ્વિતીયં ચન્દ્રશકલં ઇવ આભાતિ, તયોઃ વિપર્યાસન્યાસાત્ ઉભયમપિ મિથઃ સમ્ભૂય સુધાલેપસ્યૂતિઃ રાકાહિમકરઃ ઇવ પરિણમતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૪૬)
૭૬. યસ્યાઃ કિઞ્ચિત્ ભુગ્ને ભ્રુવૌ મધુકરરુચિભ્યાં નેત્રાભ્યાં ધૃતગુણં સવ્યેતરકરગૃહીતં પ્રકોષ્ઠે મુષ્ટૌ ચ સ્થગયતિ નિગૂઢાન્તરં રતિપતેઃ ધનુષિવ દૃશ્યતે તસ્યૈ ભુવનભયભઙ્ગવ્યસનિન્યૈ ઉમાયૈ મહાદેવ્યૈ નમઃ । (૪૭)
૭૭. યસ્યાઃ સવ્યં નયનં અર્કાત્મકતયા અહસ્સૂતે, વામં રજનીનાયકતયા ત્રિયામાં સૃજતિ, તૃતીયા દૃષ્ટિઃ દિવનિશયોરન્તરચરીં દરદલિતહેમામ્બુજરુચિઃ સન્ધ્યાં સમાધત્તે તસ્યૈ મહાદેવ્યૈ નમઃ । (૪૮)
૭૮. યસ્યાઃ દૃષ્ટિઃ વિશાલા કલ્યાણી સ્ફુટરુચિઃ કુવલયૈઃ અયોધ્યા કૃપાધારાધારા કિમપિ મધુરા આભોગવતિકા અવન્તી ઇતિ બહુનગરવિસ્તારવિજયા તત્તન્નામવ્યવહરણયોગ્યા વિજયતે તસ્યૈ મહાદેવ્યૈ નમઃ । (૪૯)
૭૯. કવીનાં સન્દર્ભસ્તબકમકરન્દૈકરસિકં કર્ણયુગળં કટાક્ષવ્યાક્ષેપભ્રમરકળભૌ નવરસાસ્વાદતરળૌ અમુઞ્ચન્તૌ દૃષ્ટ્વા યસ્યાઃ અળિકનયનં અસૂયાસંસર્ગાત્ કિઞ્ચિદરુણં દૃશ્યતે તસ્યૈ મહાદેવ્યૈ નમઃ । (૫૦)
૮૦. યસ્યાઃ દૃષ્ટિઃ શિવે શૃઙ્ગારાર્દ્રા, તદિતરજને કુત્સનપરા, ગઙ્ગાયાં સરોષા, ગિરિશચરિતે વિસ્મયવતી, હરાહિભ્યો ભીતા, સરસિરુહસૌભાગ્યજનની, સખીષુ સ્મેરા, ભક્તેષુ સકરુણા વિદ્યતે તસ્યૈ જનન્યૈ મહાદેવ્યૈ નમઃ । (૫૧)
૮૧. યસ્યાઃ નેત્રે કર્ણાભ્યર્ણં ગતે, ગરુત ઇવ પક્ષ્માણિ દધતી, પુરાં ભેત્તુઃ ચિત્તપ્રશમરસવિદ્રાવણફલે આકર્ણાકૃષ્ટસ્મરશરવિલાસં કલયતે તસ્યૈ ગોત્રાધરપતિકુલોત્તંસકલિકાયૈ મહાદેવ્યૈ નમઃ । (૫૨)
૮૨. યસ્યાઃનેત્રત્રિતયં ઉપરતાન્ દ્રુહિણહરિરુદ્રાન્ દેવાન્ પુનઃસ્રષ્ટું રજસ્સત્વં તમઃ ઇતિ ત્રયં ગુણાનાં બિભ્રત્ ઇવ વિભક્તત્રૈવર્ણ્યં વ્યતિકરિતલીલાઞ્જનતયા વિભાતિ તસ્યૈ ઈશાનદયિતાયૈ મહાદેવ્યૈ નમઃ । (૫૩)
૮૩. યા જનાન્ પવિત્રીકર્તું દયામિત્રૈઃ અરુણધવળશ્યામરુચિભિઃ નેત્રૈઃ શોણઃ, ગઙ્ગા, તપનતનયા ઇતિ ત્રયાણાં અનઘં સમ્ભેદં ઉપનયતિ ધ્રુવં તસ્યૈ પશુપતિપરાધીનાયૈ મહાદેવ્યૈ નમઃ । (૫૪)

૮૪. યસ્યાઃ ઉન્મેષનિમેષાભ્યાં જગતી પ્રળયમુદયં યાતિ તથા યસ્યાઃ ઉન્મેષાત્ જાતં જગદિદં પ્રળયતઃ પરિત્રાતું યસ્યાઃ દૃશઃ પરિહૃતનિમેષાઃ તસ્યૈ ધરણિધરરાજન્યતનયાયૈ મહાદેવ્યૈ નમઃ । (૫૫)

૮૫. યસ્યાઃ કર્ણજપનયનપૈશુન્યચકિતાઃ શફરિકાઃ અનિમેષાઃ નિયતં તોયે નિલીયન્તે તથા શ્રીઃ બદ્ધચ્છદપુટકવાટં કુવલયં પ્રત્યૂષે જહાતિ નિશિ વિઘટય્ય પ્રવિશતિ ચ તસ્યૈ અપર્ણાયૈ મહાદેવ્યૈ નમઃ । (૫૬)

૮૬. યા વને વા હર્મ્યે વા સમકરનિપાતઃ હિમકરસદૃશા દ્રાઘીયસ્યા દરદલિતનીલોત્પલરુચા દૃશા દવીયાંસં દીનં ભક્તં કૃપયા દૃશા સ્નાપયિત્વા વિના હાનિં ધન્યો ભાવયતિ તસ્યૈ શિવાયૈ મહાદેવ્યૈ નમઃ । (૫૭)

૮૭. યસ્યાઃ અરાળં પાલીયુગળં કુસુમશરકોદણ્ડકુતુકં આધત્તે યત્ર તિરશ્ચીનો વિલસન્ અપાઙ્ગવ્યાસઙ્ગઃ શ્રવણપથમુલ્લઙ્ઘ્ય શરસન્ધાનધિષણાં દિશતિ તસ્યૈ અગરાજન્યતનયાયૈ મહાદેવ્યૈ નમઃ । (૫૮)

૮૮. યસ્યાઃ સ્ફુરદ્ગણ્ડાભોગપ્રતિફલિતતાટઙ્કયુગળં મુખં, ચતુશ્ચક્રં મન્મથરથં મન્યતે, મહાવીરો મારઃ યં આરુહ્ય અર્કેન્દુચરણં અવનિરથં સજ્જિતવતે પ્રમથપતયે દ્રુહ્યતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૫૯)

૮૯. યસ્યાઃ અમૃતલહરીકૌશલહરીઃ સૂક્તિઃ શ્રવણચુલુકાભ્યાં અવિરળં પિબન્ત્યાઃ ચમત્કારશ્લાઘાચલિતશિરસઃ સરસ્વત્યાઃ કુણ્ડલગણઃ તારૈઃ ઝણત્કારૈઃ પ્રતિવચનં આચષ્ટ ઇવ શ્રૂયતે તસ્યૈ શર્વાણ્યૈ મહાદેવ્યૈ નમઃ । (૬૦)

૯૦. યસ્યાઃ નાસાવંશઃ જનાનાં ઉચિતં નેદીયઃ ફલં ફલતિ, અન્તઃ મુક્તાઃ વહતિ, યત્ તાસાં સમૃદ્ધ્યા શિશિરકરનિશ્વાસગળિતં બહિઃ અપિ મુક્તામણિધરોઽસ્તિ તસ્યૈ તુહિનગિરિવંશધ્વજપટ્યૈ મહાદેવ્યૈ નમઃ । (૬૧)

૯૧. યસ્યાઃ પ્રકૃત્યા આરક્તાયાઃ દન્તચ્છદરુચેઃ વિદ્રુમલતાફલસદૃશા બિમ્બપ્રતિફલનરાગાત્ અરુણિતં બિમ્બં તુલાં અદ્ધ્યારોઢું વિલજ્જતે તસ્યૈ સુદત્યૈ મહાદેવ્યૈ નમઃ । (૬૨)

૯૨. યસ્યાઃ વદનચન્દ્રસ્ય સ્મિતજ્યોત્સ્નાજાલં પિબતાં ચકોરાણાં અતિરસતયા ચઞ્ચુજડિમા આસીત્, અતસ્તે આમ્ળરુચયઃ નિશિ નિશિ શીતાંશોઃ અમૃતલહરીં કાઞ્ચિકધિયા સ્વચ્છન્દં ભૃશં પિબન્તિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૬૩)

૯૩. યસ્યાઃ જિહ્વા પત્યુર્ગુણગણકથામ્રેડનજપા જપાપુષ્પચ્છાયા વિદ્યતે, યદગ્રાસીનાયાઃ સ્ફટિકદૃષદચ્છચ્છવિમયી સરસ્વત્યાઃ મૂર્તિઃ માણિક્યવપુષા પરિણમતિ ચ તસ્યૈ જનન્યૈ મહાદેવ્યૈ નમઃ । (૬૪)

૯૪. રણે દૈત્યાન્ જિત્વા નિવૃત્તૈઃ, અપહૃતશિરસ્ત્રૈઃ કવચિભિઃ ચણ્ડાંશત્રિપુરહરનિર્માલ્યવિમુખૈઃ, વિશાખેન્દ્રોપેન્દ્રૈઃ યસ્યાઃ શશિવિશદકર્પૂરશકલાઃ વદનતામ્બૂલકબળાઃ વિલીયન્તે તસ્યૈ માત્રે મહાદેવ્યૈ નમઃ । (૬૫)

૯૫. પશુપતેઃ વિવિધમપદાનં ગાયન્તી વાણી યયારબ્ધે સાધુવચને તદીયૈર્માધુર્યૈઃ અપલપિતતન્ત્રીકળરવાં નિજાં વીણાં ચોળેન નિભૃતં નિચુળયતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૬૬)

૯૬. તુહિનગિરિણા વત્સલતયા સ્પૃષ્ટં, ગિરિશેન અધરપાનાકુલતયા મુહુરુદસ્તં, શમ્ભોઃ કરગ્રાહ્યં, મુખમુકુરવૃન્તં યસ્યાઃ ઔપમ્યરહિતં ચુબુકં અવર્ણનીયં વિદ્યતે તસ્યૈ ગિરિસુતાયૈ મહાદેવ્યૈ નમઃ । (૬૭)

૯૭. યસ્યાઃ ગ્રીવા નિત્યં પુરદમયિતુઃ ભુજાશ્ળેષાત્ કણ્ટકવતી મુખકમલનાળશ્રિયં ધત્તે, અધઃ સ્વભાવેન સ્વતઃ શ્વેતા યત્ કાલાગરુબહુલજમ્બાલમલિના હારલતિકા મૃણાળીલાળિત્યં વહતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૬૮)

૯૮. યસ્યાઃ વિવાહવ્યાનદ્ધપ્રગુણગુણસઙ્ખ્યાપ્રતિભુવઃ ગળે તિસ્રઃ રેખાઃ નાનાવિધમધુરરાગાકરભુવાં ત્રયાણાં ગ્રામાનાં સ્થિતિનિયમસીમાનઃ ઇવ વિરાજન્તે તસ્યૈ ગતિગમકગીતૈકનિપુણાયૈ મહાદેવ્યૈ નમઃ । (૬૯)

૯૯. સરસિજભવઃ પ્રમથમથનાત્ અન્ધકરિપોઃ નખેભ્યઃ સન્ત્રસ્યન્ ચતુર્ણાં શીર્ષાણાં સમં અભયહસ્તાર્પણધિયા ચતુર્ભિઃ વદનૈઃ યસ્યાઃ મૃણાળીમૃદ્વીનાં ચતસૃણાં ભુજલતાનાં સૌન્દર્યં સ્તૌતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૭૦)
૧૦૦. યસ્યાઃ નખાનાં ઉદ્યોતૈઃ નવનળિનરાગં વિહસતાં કરાણાં કાન્તિઃ અવર્ણનીયમસ્તિ યસ્યાઃ સામ્યં કમલં ક્રીડલ્લક્ષ્મીચરણતલલાક્ષારસચણં યદિ ભવેત્ તદા કયાચિદ્વા કલયા ભજેત્ તસ્યૈ ઉમાદેવ્યૈ મહાદેવ્યૈ નમઃ । (૭૧)
૧૦૧. યસ્યાઃ સમં સ્કન્દદ્વિપવદનપીતં સતતં પ્રસ્નુતમુખં સ્તનયુગં આલોક્ય હેરમ્બઃ આશઙ્કાકુલિતહૃદયઃ હાસજનકઃ હસ્તેન સ્વકુમ્ભૌ ઝટિતિ પરિમૃશતિ તસ્યૈ ભક્તખેદહારિણ્યૈ મહાદેવ્યૈ નમઃ । (૭૨)
૧૦૨. યસ્યાઃ અમૃતરસમાણિક્યકુતુપૌ વક્ષોજૌ પિબન્તૌ દ્વિરદવદનક્રૌઞ્ચદલનૌ કુમારૌ અદ્યાપિ અવિદિતવધૂસઙ્ગરસિકૌ ભવતઃ તસ્યૈ નગપતિપતાકાયૈ મહાદેવ્યૈ નમઃ । (૭૩)
૧૦૩. યસ્યાઃ કુચાભોગઃ સ્તમ્બેરમદનુજકુમ્ભપ્રકૃતિભિઃ મુક્તામણિભિઃ સમારબ્ધાં બિમ્બાધરરુચિભિઃ અન્તઃશબળિતાં અમલાં હારલતિકાં પુરદમયિતુઃ પ્રતાપવ્યામિશ્રાં કીર્તિં ઇવ વહતિ તસ્યૈ અમ્બાયૈ મહાદેવ્યૈ નમઃ । (૭૪)
૧૦૪. યસ્યાઃ સ્તન્યં હૃદયતઃ પયઃપારાવારઃ સારસ્વતમિવ પરિવહતિ યયા દયાવત્યા દત્તં સ્તન્યં આસ્વાદ્ય દ્રવિડશિશુઃ પ્રૌઢાનાં કવીનાં કમનીયઃ કવયિતા અજનિ તસ્યૈ ધરણિધરકન્યાયૈ મહાદેવ્યૈ નમઃ । (૭૫)
૧૦૫. મનસિજઃ હરક્રોધજ્વાલાવલિભિઃ અવલીઢેન વપુષા યસ્યાઃ નાભીસરસિ કૃતસઙ્ગઃ તસ્માત્ સમુત્તસ્થૌ ધૂમલતિકા જનઃ યસ્યાઃ રોમાવલિઃ ઇતિ જાનીતે તસ્યૈ અચલતનયાયૈ મહાદેવ્યૈ નમઃ । (૭૬)
૧૦૬. યસ્યાઃ કૃશે મધ્યે કાળિન્દીતનુતરતરઙ્ગાકૃતિ ભાન્તં યદ્વસ્તુ કુચકલશયોઃ અન્યોન્યં વિમર્દાત્ અન્તરગતં કુહરિણીં નાભિં પ્રવિશત્ વ્યોમ ઇવ સુધિયાં ભાતિ તસ્યૈ જનન્યૈ શિવાયૈ મહાદેવ્યૈ નમઃ । (૭૭)
૧૦૭. યસ્યાઃ નાભિઃ સ્થિરઃ ગઙ્ગાવર્તઃ, સ્તનમુકુળરોમાવલિલતાકલાવાલં, કુસુમશરતેજોહુતભુજઃ કુણ્ડં, રતેઃ લીલાગારં, ગિરિશનયનાનાં સિદ્ધેઃ બિલદ્વારં ઇતિ કિમપિ વિજયતે તસ્યૈ ગિરિસુતાયૈ મહાદેવ્યૈ નમઃ । (૭૮)
૧૦૮. યસ્યાઃ નિસર્ગક્ષીણસ્ય સ્તનતટભરેણ ક્ળમજુષઃ નમન્મૂર્તેઃ શનકૈઃ ત્રુટ્યત ઇવ ત્રુટિતતટિનીતીરતરુણા સમાવસ્થાસ્થેમ્નઃ મધ્યઃ ચિરં કુશલો ભવતુ ઇતિ કવિના પ્રાર્થિતઃ તસ્યૈ નારીતિલકાયૈ શૈલતનયાયૈ મહાદેવ્યૈ નમઃ । (૭૯)
૧૦૯. યસ્યાઃ દેવ્યાઃ સદ્યઃ સ્વિદ્યત્તટઘટિતકૂર્પાસભિદુરૌ દોર્મૂલે કષન્તૌ કનકકલશાભૌ કુચૌ કલયતા તનુભુવા ભઙ્ગાત્ ત્રાતું અલં ઇતિ વલગ્નં ત્રિવલિ લવલીવલ્લિભિઃ ત્રિધા નદ્ધં પ્રતીયતે તસ્યૈ મહાદેવ્યૈ નમઃ । (૮૦)
૧૧૦. ક્ષિતિધરપતિઃ નિજાત્ નિતમ્બાત્ ગુરુત્વં વિસ્તારં હરણરૂપેણ નિદધે, અતઃ યસ્યાઃ નિતમ્બપ્રાગ્ભારઃ ગુરુઃ વિસ્તીર્ણઃ સન્ અશેષાં વસુમતીં સ્થગયતિ, લઘુત્વં પ્રાપયતિ તસ્યૈ પાર્વત્યૈ મહાદેવ્યૈ નમઃ । (૮૧)
૧૧૧. યસ્યાઃ ઊરુયુગ્મેન કરીન્દ્રાણાં કનકકદલીકાણ્ડપટલીં ઇતિ ઉભયં, પત્યુઃ પ્રણતિકઠિનાભ્યાં સુવૃત્તાભ્યાં જાનુભ્યાં વિબુધકરિકુમ્ભદ્વયં અપિ નિર્જિત્ય ભવતિ તસ્યૈ વિધિજ્ઞાયૈ ગિરિસુતાયૈ મહાદેવ્યૈ નમઃ । (૮૨)
૧૧૨. વિષમવિશિખઃ રુદ્રં પરાજેતું યસ્યાઃ જઙ્ઘે દ્વિગુણશરગર્ભૌ નિષઙ્ગૌ અકૃત, યદગ્રે સુરમકુટશાણૈકનિશિતાઃ પાદયુગળીનખાગ્રચ્છદ્માનઃ દશશરફલાઃ દૃશ્યન્તે તસ્યૈ ગિરિસુતાયૈ મહાદેવ્યૈ નમઃ । (૮૩)
૧૧૩. યસ્યાઃ ચરણયુગળં શ્રુતીનાં મૂર્દ્ધાનઃ શેખરતયા દધતિ, યસ્યાઃ પાદ્યં પાથઃ પશુપતિજટાજૂટતટિની, યસ્યાઃ લાક્ષાલક્ષ્મીઃ અરુણહરિચૂડામણિરુચિઃ, તસ્યૈ માત્રે મહાદેવ્યૈ નમઃ । (૮૪)

૧૧૪. યસ્યાઃ સ્ફુટરુચિરસાલક્તકવતઃ પદદ્વન્દ્વં નયનરમણીયં ભવતિ, પશૂનાં ઈશાનઃ યદભિહનનાય સ્પૃહયતે, પ્રમદવનકઙ્કેળિતરવે અત્યન્તં અસૂયતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૮૫)
૧૧૫. મૃષા ગોત્રસ્ખલનં કૃત્વા અથ વૈલક્ષ્યનમિતં ભર્તારં યસ્યાઃ ચરણકમલે લલાટે તાડયતિ સતિ, ચિરાત્ દહનકૃતં અન્તશ્શલ્યં ઉન્મૂલિતવતા ઈશાનરિપુણા તુલાકોટિક્વાણૈઃ કિલિકિલિતા તસ્યૈ મહાદેવ્યૈ નમઃ । (૮૬)
૧૧૬. હિમગિરિનિવાસૈકચતુરં નિશિ ચરમભાગે ચ વિશદૌ સમયિનાં શ્રિયં અતિસૃજન્તં યસ્યાઃ પાદયુગળં હિમાનીહન્તવ્યં નિશાયાં નિદ્રાણાં વરં લક્ષ્મીપાત્રં સરોજં જયતઃ તસ્યૈ મહાદેવ્યૈ નમઃ । (૮૭)
૧૧૭. યસ્યાઃ કીર્તીનાં પદં વિપદાં અપદં સદ્ભિઃ કઠિનકમઠીકર્પરતુલાં નીતં પ્રપદં પુરભિદા દયમાનેન મનસા બાહુભ્યાં આદાય દૃષદિ ન્યસ્તં તસ્યૈ મહાદેવ્યૈ નમઃ । (૮૮)
૧૧૮. યસ્યાઃ ચરણયુગ્મં દરિદ્રેભ્યઃ ભદ્રાં શ્રિયં અનિશં અહ્નાય દદતં, નાકસ્ત્રીણાં કરકમલસઙ્કોચશશિભિઃ નખૈઃ કિસલયકરાગ્રેણ સ્વઃસ્થેભ્યઃ ફલાનિ દદતાં દિવ્યાનાં તરૂણાં હસતઃ ઇવ દૃશ્યતે તસ્યૈ ચણ્ડ્યૈ મહાદેવ્યૈ નમઃ । (૮૯)
૧૧૯. દીનેભ્યઃ આશાનુસદૃશીં શ્રિયં અનિશં દદાને સૌન્દર્યપ્રકરમકરન્દં અમન્દં વિકિરતિ, મન્દારસ્તબકસુભગે યસ્યાઃ ચરણે કરચરણઃ નિમજ્જન્ ભક્તસ્ય જીવઃ ષટ્ચરણતાં પ્રાપ્નોતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૯૦)
૧૨૦. સ્ખલન્તઃ ભવનકળહંસાઃ પદન્યાસક્રીડાપરિચયં આરબ્ધુમનસઃ ઇવ યસ્યાઃ ખેલં ન જહતિ, અતઃ યસ્યાઃ ચરણકમલં સુભગમણિમઞ્જીરરણિતચ્છલાત્ તેષાં શિક્ષાં આચક્ષાણં ઇવ વિલસતિ તસ્યૈ ચારુચરિતાયૈ મહાદેવ્યૈ નમઃ । (૯૧)
૧૨૧. દ્રુહિણહરિરુદ્રેશ્વરભૃતઃ યસ્યાઃ મઞ્ચત્વં ગતા, શિવઃ સ્વચ્છચ્છાયાઘટિતકપટપ્રચ્છદપટઃ યસ્યાઃ ભાસાં શરીરી શૃઙ્ગારરસઃ ઇવ દૃશાં કુતુકં દોગ્ધિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૯૨)
૧૨૨. યા કેશેષુ અરાળા, મન્દહસિતે પ્રકૃતિસરળા, ચિત્તે શિરીષાભા, કુચતટે દૃષદુપલશોભા, મધ્યે ભૃશં તન્વી, ઉરસિજારોહવિષયે પૃથુઃ, જગત્ ત્રાતું શમ્ભોઃ કાચિત્ કરુણા ઇતિ જયતિ તસ્યૈ અરુણાયૈ મહાદેવ્યૈ નમઃ । (૯૩)
૧૨૩. કલઙ્કં કસ્તૂરી, રજનિકરબિમ્બં કલાભિઃ કર્પૂરૈઃ નિબિડિતં મરકતકરણ્ડં, અતઃ યસ્યાઃ ભોગેન પ્રતિદિનં રિક્તકુહરં ઇદં વિધિઃ ભૂયઃ ભૂયઃ યસ્યાઃ કૃતે નૂનં નિબિડયતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૯૪)
૧૨૪. યા પુરારાતેઃ અન્તપુરં, તતઃ યસ્યાઃ ચરણયુગળે સપર્યામર્યાદા તરળકરણાનાં અસુલભા, તથા હિ શતમખમુખાઃ અમરાઃ યસ્યાઃ દ્વારોપાન્તસ્થિતિભિઃ અણિમાદ્યાભિઃ અતુલાં સિદ્ધિં નીતાઃ તસ્યૈ મહાદેવ્યૈ નમઃ । (૯૫)
૧૨૫. કતિ કતિ કવયઃ વૈધાત્રં કળત્રં ન ભજન્તે? કૈઃ ધનૈઃ અપિ કઃ વા શ્રિયઃ દેવ્યાઃ પતિઃ ન ભવતિ? યસ્યાઃ કુચાભ્યાં આસઙ્ગઃ મહાદેવં હિત્વા કુરવકતરોરપિ અસુલભઃ તસ્યૈ સતીનામચરમાયૈ સત્યૈ મહાદેવ્યૈ નમઃ । (૯૬)
૧૨૬. યાં આગમવિદઃ દ્રુહિણગૃહિણીં ગિરાં દેવીં, હરેઃ પત્નીં પદ્માં, હરસહચરાં અદ્રિતનયાં આહુઃ, યા તુરીયા દુરધિગમનિસ્સીમમહિમા કાપિ મહામાયા અસિ, યા વિશ્વં ભ્રમયસિ તસ્યૈ પરબ્રહ્મમહિષ્યૈ મહાદેવ્યૈ નમઃ । (૯૭)
૧૨૭. યસ્યાઃ કલિતાલક્તકરસં ચરણનિર્ણેજનજલં પ્રકૃત્યા મૂકાનામપિ કવિતાકારણતયા વાણીમુખકમલતામ્બૂલરસતાં ધત્તે તસ્યૈ માત્રે મહાદેવ્યૈ નમઃ । (૯૮)
૧૨૮. યસ્યાઃ ભજનવાન્ સરસ્વત્યા, લક્ષ્મ્યા, વિધિહરિસપત્નઃ વિહરતે, રમ્યેણ વપુષા રતેઃ પાતિવ્રત્યં શિથિલયતિ, ક્ષપિતપશુપાશવ્યતિકરઃ ચિરં જીવન્નેવ પરાનન્દાભિખ્યં રસં રસયતિ તસ્યૈ મહાદેવ્યૈ નમઃ । (૯૯)

૧૨૯. યથા સ્વકીયાભિઃ પ્રદીપજ્વાલાભિઃ દિવસકરનીરાજનવિધિઃ, યથા સ્વકીયૈ ચન્દ્રોપલજલલવૈઃ સુધાસૂતેઃ અર્ઘ્યરચના, યથા સ્વકીયૈ અમ્ભોભિઃ સલિલનિધિસૌહિત્યકરણં તથા દેવીપ્રસાદેન લબ્ધવાગ્ભિઃ શઙ્કરભગવત્પાદાચાર્યેણ મહાસ્તોત્રં કૃત્વા સ્તુતાયૈ મહાદેવ્યૈ નમઃ । (૧૦૦)
૧૩૦. તથા ગુરુપ્રસાદેન લબ્ધવાગ્ભિઃ સ્તુત્વા ઇયં નામાવલિઃ મહાદેવીચરણયુગળે અનન્યભક્ત્યા સમર્પયામિ ।

ૐ તત્ સત્ ।
શુભમસ્તુ ।
ૐ શ્રી મહાદેવ્યૈ નમઃ ।
સર્વં ખલ્વિદમેવાહં નાન્યદસ્તિ સનાતનં ઇતિ દેવીવચનમ્ ।
અજ્ઞાનાત્ વિસ્મૃતેર્ભ્રાન્ત્યા યન્ન્યૂનમધિકં કૃતં તત્સર્વં ક્ષમ્યતાં દેવિ પ્રસીદ પરમેશ્વરિ ।
શ્રી હેમામ્બિકાયૈ નમઃ ।
દેવીકૃપયા નામસમાહરણં - મઠત્તિલ્ નરેન્દ્રન્
કૃતજ્ઞતા - શ્રી મોહન્ ચેટ્ટૂર્

Compiler’s Contact Details: Madathil Narendran, Nama Sivaya, Kallekulangara, Palakkad-678009, Kerala, India.
E-mail: madathilnarendran at gmail dot com  Ph. (91) 94950-35516
Any shortcomings or errors noted may please be communicated to compiler for review and correction.

---

*Devi Namavali from Shankaracharya’s Saundaryalahari*
pdf was typeset on May 11, 2024

Please send corrections to *sanskrit@cheerful.com*